CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S D P B.

Coll. No. 885

Title [illegible]

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 885 Subject: Puranic Rit

Title: Pārthiva liṅgodyāpana.

Author: Scribe: –

Date of the work: – Date of the Ms.: –

Place of the work: – Place of the Ms.: –

Size: 5.8" by 4.2" Extent: 3 foll

Language: Sanskrit Script: Devanāgari

Remarks: –

श्रीगणेशायनमः॥ नारदउ०॥ कथं पार्थिवपू
जायाविधिसैंयास्तुरेश्वर॥ किं फलं चास्य वि
सेषं कथमुद्यापनं भवेत्॥ किंयत्कालेन चक
र्तव्यं प्रारंभं च कथं भवेत्॥ कथयाशु महादे
व लोकानामुपकारकं॥ ईश्वरउ०॥ धर्मार्थका
म मोक्षार्थं पार्थिवं पूजये सदा॥ मृद्मानीय
शुद्धा दोशर्करा वर्जिता शुभा॥ सिंधोदकेन
शुद्धेन मर्दयित्वा तु घट्टयेत्॥ प्रारंभोस्य प्र
कर्त्तव्यो माघमासे सितेतरे॥ चतुर्दश्यां वि
शेषेण सर्वकार्यार्थसिद्धये॥ अथवा श्रावणे
मासि इंदुवारे शुभे ग्रहे॥ स्नात्वा संपूज्य गणेषं

स्वस्तिवाचनपूर्वकं ॥ आजन्मपूजयेच्छंभुं सं
वत्सरमथापि वो ॥ सुपाद्यसर्वकेभावान्नु
जयेन्मन्मथं शुभं ॥ शिवे तिमहृमादाय महे
शोद्यहूने स्मृतः ॥ शंभुः प्रोक्तः प्रतिष्ठायां
पिनाकी प्राशने मतः ॥ शशिशेखरपूजा
यां वामदेवोपि धूपके ॥ विरूपाक्षोपि विसे
र्गो दीपदाने विशेषतः ॥ उपहारे कपर्दी
स्यात्तांबूले शितिकंठकः ॥ दक्षिणायां उमा
कांतो नीललोहिति विसर्जेत् ॥ एवं पूजा प्र
कर्त्तव्या तंदुलैर्बिल्वपत्रकैः ॥ संवत्सरे तु सं
पूर्णे उद्यापनविधिं चरेत् ॥ आचार्यं वरयेत्स

र्वं द्वादशगन्स्त्वित्विजांस्ततः ॥ विरच्य लिंगतो
भद्रं पंचवर्णैः शुभं स्मृतं ॥ ब्रह्मादिस्थापनं कृ
त्वा कलशं स्थापयेत्ततः ॥ शिवप्रतिमा सौव
र्णीरजतस्य हृषस्मृतः ॥ वस्त्रद्वयेन संवेष्ट्य
उपचारैस्तु षोडशैः ॥ पूजयित्वा विधानेन
अधिवासनपूर्वकं ॥ गीतवादित्रनिर्घोषै
र्जागरं तत्र कारयेत् ॥ स्तोत्रैश्च विविधैः सू
क्तैः पूजयेत्परमेश्वरं ॥ चतुर्दशी दर्शयुक्ता
पारणे प्यधिकामता ॥ मत्स्यपूजयेति मंत्रेण
अग्नौ कृत्वा च पायसं ॥ लिंगसंख्या दशांशेन
होमः कार्यो विधानतः ॥ अथवा नाममंत्रेण

पायसंजुक्तया हुती॥ तर्पणं च प्रकर्त्तव्यं तद्दशां
शेन सर्वदा॥ मार्जनं तद्दशांशेन तद्दशांशे
न भोजयेत्॥ आचार्यं पूजयेद्भक्त्या वस्त्रालं
कारभूषणैः॥ धेनुं दद्यात्सवत्सां च शिवसं
तोषहेतवे॥ शिवरूपाश्च ते विप्रा दक्षिणा
वस्त्रसंयुता॥ पूजयित्वा विधानेन नमस्कु
र्यात्पुनः पुनः॥ शिवपीठं च तत्सर्वं आचा
र्याय निवेदयेत्॥ शिवभक्त्यात्मकं यस्माज्ज
गदेतच्चराचरं॥ तस्मादेतेन मे सर्वं करोतु
भगवान् शिवः॥ कैलाशवासि गौरीशो भ
गवान् भक्तवत्सलः॥ चराचरात्मको लिंगरू

पी दिशत्वांछितं॥ इति प्रार्थ्य ततो वि
प्रान् नमस्कृत्वा विसर्जयेत्॥ स्वयंभुं
जीत वै भक्त्या बंधुवर्गैः समन्वितः॥
इति ते कथितं विप्र सर्वकामार्थसि
द्धिदं॥ शिवलोकं समासाद्य तत्रैव व
सते चिरं॥ इति भविष्ये पार्थिवलिं
गोद्यापनं॥